कर्तृत्वस्याशरीरत्वसमानाधिकरणस्योपलम्भात् तदनुपस्थाने तु न विरोधः विरोधाश्रयस्यासिद्धेः पञ्चमे च विपक्षबाधकतर्कसत्त्वात् तदभावनिबन्धनाज्ञानरूपासिद्धिव्याप्यत्वासिद्धिर्वा न शरीरजन्यत्वोपाधेरपि विपक्षबाधकाभावेनापास्तत्वात्। ननु यदीश्वरः कर्त्ता स्यात् शरीरी स्यादिति प्रतिकूलतर्कावतारस्तत्राह" हरि०। "तर्काभासतया त्वेषा तर्काशुद्धिरदूषणम्। अनुकूलस्तु तर्कोऽत्र कार्य्यलोपो विभूषणम्" का०। "प्रतिकूलतर्कास्तावदीश्वरासिद्ध्या आश्रयासिद्धा इत्याभासाः। कर्तारं विना कार्य्यं न स्यादिति तर्कस्तु विभूषणं सहकारकः। "अहं सर्व्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते" इत्यागमस्यात्र। "आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना। यस्तर्केणानुसन्धत्ते स धर्म्मं वेद नेतर" इति तर्कानुगृहीतस्यागमस्य बलवत्त्वम्" ननु कार्य्यत्वं प्रयत्नजन्यत्वेऽप्रयोजकम् अत्राह" हरि०। "स्वातन्त्र्ये जडताहानिर्निर्दिष्टं दृष्टघातकम्। हेत्वभावे फलाभावो विशेषस्तु विशेषवान्" का०। "न हि कर्तारं हेतुं विना कार्यं परमाणोरेव यत्नवत्त्वेऽचैतन्यानुपपत्तिः अचेतनस्य चेतनप्रेरितस्यैव जनकत्वात् अदृष्टस्य दृष्टकारणसहकारेणैव फलजनकत्वात्। न च चेष्टायामेव भोक्तृप्रयत्नो हेतुः न तु क्रियासामान्ये इति, चेष्टायां विशेषप्रयत्नस्य हेतुत्वेऽपि क्रियासामान्ये प्रयत्नसामान्यस्य कारणत्वानपायात् अन्यथा वीजविशेषस्याङ्कुरविशेषे जनकत्वे नाङ्कुरसामान्यं प्रति वीजत्वेन हेतुताया अपि विलोपापत्तेः ननु धृत्यादीनां प्रयत्नजन्यत्वे किं मानमित्यत्राह" हरि०। "कार्य्यत्वान्निरुपाधित्वमेवं धृतिविनाशयोः। विच्छेदेन पदस्यापि प्रत्ययादिश्च पूर्व्ववत्"। "धृतिविनाशयोः प्रयत्नजन्यत्वान्निरुपाधित्वं विच्छेदेनान्तरा प्रलयेन आदर्शाद्यभावात् अर्व्वाग्दर्शी नाद्यव्यवहारमूलं व्यवहारानभिज्ञत्वादिति सर्गाद्यकालीन घटादिव्यवहारप्रवर्त्तकः पुरुषः सिध्यति। एवं प्रत्ययादेर्वेदजन्यधीप्रामाण्यादेरपि निरुपाधित्वम्" हरि०।

विस्तरेणेश्वरानुमानग्रन्थस्य प्रायेण लुप्तप्रायतया कुसुमाञ्जलिग्रन्थे दिङ्मात्रेण तत्प्रकारस्य सत्त्वेऽपि न्यायकन्दल्याम् अनुमानचिन्तामणिस्थेश्वरवादे च विस्तरेण वर्णितं तयोश्च प्रायेण लुप्तप्रायतया तयोः प्रचारार्थमिहोपन्यासः क्रियते तत्रादौ

न्यायकन्दली। "किं पुनरीश्वरसद्भावे प्रमाणम् आगमस्तावत् अनुमानञ्च महाभूतचतुष्टयमुपलब्धिमत्पूर्व्वकं कार्य्यत्वात् यत्कार्य्यं तदुपलब्धिमत्पूर्व्वकं यथा घटकार्य्यं, कार्य्यञ्च महाभूतचतुष्टयं तस्मादेतदप्युपलब्धिमत्पूर्व्वकमिति। ननु प्रमाणेन पूर्व्वकोऽप्यनुपलब्धेरसिद्धं पृथिव्यादिषु कार्य्यत्वमिति चेत् तदयुक्तं सावयवत्वात् तत्सिद्धेः यत् सावयवं तत्कार्य्यं यथा घटः सावयवञ्च पृथिव्यादि तस्मादेतदपि कार्य्यमेव॥ ननु व्याप्तिग्रहणादनुमानप्रवृत्तिः कार्य्यत्वबुद्धिमत्पूर्व्वकत्वयोश्च व्याप्तिग्रहणमशक्यं, घटादिषु कर्त्तृप्रतीतिकाले एवाङ्कुरादिषूत्पद्यमानेषु तदभावप्रतीतेः न चाङ्कुरादीनामपि पक्षत्वमिति न्याय्यं संगृहीतायां व्याप्तावनुमानप्रवृत्तिकाले प्रतिवाद्यपेक्षया पक्षादिप्रविभागः इह तु सर्व्वदैव प्रतिपक्षप्रतीत्याक्रान्तत्वाद्व्याप्तिग्रहणमेव न सिध्यति। अत्र प्रतिसमाधीयते। यदि चैवं दृष्टानुपलम्भाद्व्याप्तिग्रहणाभावः तदानीं मीमांसाभाष्यकृतोऽभिमतं सामान्यतोदृष्टमादित्यगत्यनुमानमपि न सिद्ध्यति तत्रापि देवदत्तगतिपूर्व्वकदेशान्तरप्राप्तिग्रहणकाल एव नक्षत्रादिप्रदेशान्तरप्राप्तिमात्रोपलम्भात् अथ तेषु देशविप्रकर्षेणापि गतेरनुपलब्धौ सम्भवन्त्यां न तया व्याप्तिग्रहणहेतोर्निरुपाधिप्रवृत्तस्य भूयोदर्शनस्य प्रतिरोधः तुल्यकक्षत्वाभावात् एवञ्चेदशरीरत्वेनाभ्युपेतस्य कर्त्तुः स्वरूपविप्रकर्षेणाप्यङ्कुरादिष्वनुपलम्भसम्भवात् न तेन निरुपाधिप्रवृत्तस्य भूयोदर्शनस्य सामर्थ्यमुपहन्यते इति समानम्। अपि च भोः किमनेन कर्तृमात्रं साध्यते पृथिव्यादिनिर्म्माणसमर्थो वा। कर्तृमात्रसाधने तावदभिप्रेतासिद्धिः न ह्यस्मदादिसदृशः कर्त्ताऽभिप्रेतो भवतां नच तेनेदं पृथिव्यादिकार्य्यमर्वाग्दृशा शक्यनिर्म्माणम्, पृथिव्यादि निर्म्माण समर्थस्तु न सिद्ध्यति अनन्वयात् अन्वयबलेन हि दृष्टान्तदृष्टकर्त्तृसदृशः सिध्यतीति नायं प्रसङ्गः। कर्तृविशेषस्याप्रसाधनात्। व्याप्तिसामर्थ्याद्बुद्धिमत्पूर्व्वकत्वसामान्ये साध्यमाने पृथिव्यादिनिर्म्माणसामर्थ्यलक्षणोऽपि विशेषः सिध्यत्येव निर्विशेषस्य सामान्यस्य सिद्ध्यभावात्। ननु मा सिध्यतु सामान्यमिति चेत् कार्य्यत्वेन सह तद्व्याप्तेः प्रतिक्षेपात्। यदि हि व्याप्तमपि न सिध्यति धूमादग्निसामान्यं न सिध्येत् अग्निविशेषस्यानन्वितस्यासिद्धेः निर्विशेषस्यानवस्थानात्। अथेदमुच्यते द्वयमनुमानस्य स्वरूपं व्याप्तिः पक्षधर्मता च तत्र व्याप्तिसामर्थ्यात् सामान्यं सिध्यति पक्षधर्म्मताबलेन चाभिप्रेतो विशेषः पर्व्वताद्यवच्छिन्नवह्निलक्षणात् सा सिद्ध्यति अन्यथा पक्षधर्म्मतायाः कोपयोगः क्व वानुमानस्य गृहीतग्राहिणः प्रामाण्यम्। एवञ्चेत् ईश्वरानुमानेऽपि तुल्यमन्यत्राभिनिवेशात् अथ मतं सिद्ध-